Reg No 177/2008-2009 ISSN: 2322–0317

# PSSH PERSPECTIVE of SOCIAL SCIENCES and HUMANITIES

An International Multidisciplinary Refereed Research Journal

VOL 2, NO 2

JULY - DECEMBER 2013

Biannual

Editor

*Dr Hemant Kumar Singh*

Assistant Professor

Economics Department

Madan Mohan Malviya PG College

Deoria (UP)

Publisher

*Herambh Welfare Society*

Varanasi (India)

# वैदिकवाङ्मये दर्शनानां वैशिष्ट्यम

बी.उमामहेश्वरी[1]

भारतीयज्ञानगङ्गायाः स्रोतांसि वेदा एव भवन्ति। वेदाः भारतीयाणां ज्ञाननिधयो भवन्ति। वेदाः स्वयं भासन्तः सन् तया प्रभया समस्तभारतीयवैदिकवाङ्मयं प्रभासयन्ति।तत्रायं वेदः अस्माकं संस्कृतेः मूलस्रोतसमस्ति। यतो हि विश्वस्यागमेषु वेदाः अतिप्राचीनतमाः सन्ति। अत एव नृशास्त्रज्ञानां, मानवप्रकृतेरध्येतॄणां जगतः विभिन्नेषु शास्त्रेषु धर्मेषु प्रवर्तमानानां जनानां रुचिकरा इमे वेदा एवेति सर्वेषां विदितचरं भवति। को नाम वेदः? कीदृशो भवति? किं तस्य स्वरूपम्? इत्येतादृशप्रश्नानामुत्तराणि अधः द्रक्ष्यामः।

**वेदशब्दस्यार्थ**

विद् धातोः 'घञ्' प्रत्यये कृते निष्पन्नोयं वेदशब्दः ज्ञानार्थकः।आम्नायः,छन्दः,ब्रह्म, निगमः, प्रवचनम्,आगमः,वेदः, श्रुतिः, शब्दः इत्यादयः सर्वेऽपि शब्दाः वेदशब्दस्यैव पर्यायवाचकाः भवन्ति। विद् धतोः प्रयोगः चतुर्ष्वर्थेषु भवति। तद्यथा—

**'सत्तायां विद्यते ज्ञाने वेत्ति विन्ते विचारणे।**
**विन्दते विन्दति प्राप्तौ श्यन्लुक्श्नम्शेष्विदं क्रमात्'।।[2]**

उक्तार्थानां वाचकात् विद् धातोः वेद इतिपदस्य निष्पत्तिर्भवति। **सत्तार्थक-विद्धातोः** घञ् प्रत्ययात् निष्पन्नस्य 'वेद'इत्येतत्पदस्याऽर्थो भवति—**'विद्यते सत्तां गृह्णाति वस्तु अनेन'** इति 'वेदः'। **ज्ञानार्थक** विद्धातोः घञ् प्रत्ययान्निष्पन्नस्य 'वेद' इत्येतत्पदस्यार्थोऽस्ति –**'विद्यन्ते एभिः धर्म ब्रह्मणि क्रियाज्ञानमयं ब्रह्म वा'**इति 'वेदः'।**विचारार्थकात्** विद्धातोः'अच्' प्रत्ययान्निष्पन्नस्य 'वेद' इत्येतत्पदस्यार्थस्तु— **'विन्ते विचारयति धर्मब्रह्मणि क्रियाज्ञानमयं ब्रह्म वा'** इति 'वेदः'। **लाभार्थकात्** विद्धातोः घञ् प्रत्ययान्निष्पन्नस्य 'वेद' इत्येतत्पदस्यार्थऽस्तु—**'विदन्ते स्वरूपं लभन्ते वस्तु अनेन'** इति 'वेदः'।

**'विदन्ति जानन्ति, विद्यन्ते, भवन्ति, विन्ते, विचारयति, विदन्ते, लभन्ते, सर्वे मनुष्याः सत्त्वविद्यां यैर्येषु वा तथा विद्वांसश्च भवन्ति ते**

[1] **शोधछात्रा, वैदिकदर्शनविभागः, संस्कृतविद्याधर्मविज्ञानसङ्कायः, काशीहिन्दूविश्वविद्यालयः**

[2] वैयाकरणसिद्धान्तकौमुदी चुरादिप्रकरणम्.

**वेदाः'**[1]।'मन्त्रब्राह्मणयोर्वेदनामधेयम्' इति यास्कवचनम्।

**'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः'**[2] इति। तत्र प्रमाणमपि—

> **'प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।**
> **एतं विदन्ति वेदेन तस्माद्वेदस्य वेदता।।'**[3]

सायणस्तु **'अपौरुषेयवाक्यं वेद'**इत्युक्तवान्।वेदस्यापौरुषेयत्वं मन्यन्ते।

**वेद महत्त्वम्**

पाश्चात्य विद्वांसः वेदान् ऋषिप्रणीतान् मन्यन्ते। किञ्च वेदमर्मज्ञाः मेधाविनः भारतीयविद्वांसः तान् न ऋषिकृतान् मन्यन्ते। तेषां मते ऋषयो मन्त्रद्रष्टारः भवन्ति न तु कर्तारः। अलौकिकसामर्थ्यशालिन ऋषयः दिव्यया दृष्ट्या मन्त्राणां दर्शनं लब्धवन्तः। ततः शिष्यान् बोधितवन्तः। एवं वेदानामाविर्भावोऽभवदिति। **'तद्येतास्तपस्यमानम् ब्रह्मस्वयम्भ्वभ्यानर्षत्'**[4] इत्यादिकाः पङ्क्तय ऋषीणां मन्त्रद्रष्टुत्वमुपपादयन्ति।

प्रधानतया वेदो द्विविधः—मन्त्ररूपो ब्राह्मणरूपश्चेति। तत्र मन्त्रसमुदाय एव **'संहिता'**शब्देन व्यवहृतः। ब्राह्मणभागो 'यागस्वरूप' बोधकतया प्रसिद्धः। अयं संहितायाः व्याख्यारूपो भवति। अयं ब्राह्मणग्रन्थः त्रिधा भवति- **ब्राह्मणम्, आरण्यकम्, उपनिषदिति**। तत्र यज्ञस्वरूपप्रतिपादको ब्राह्मणभागः। यज्ञस्य आध्यात्मिकं रूपं विवेचयन्तो वेदभागा आरण्यकानि। उपनिषदो ब्रह्मबोधिकाः मोक्षसाधनानि, 'वेदान्त' शब्देनापि व्यवह्रियन्ते। तत्र संहिताभागो ब्रह्मचारिणामुपयोगी, ब्राह्मणभागो गृहस्थानामुपयोगी, आरण्यकभागो वानप्रस्थानाम्, उपनिषदश्च सन्न्यस्तानामुपयोगीत्यपि कथयितुं शक्यते। अस्य वङ्मयस्य वयोवर्शिष्टत्वेन, महामहीमण्डलव्यापित्वेन, दुष्परिच्छेदेन परिमाणेन, निरतिशयेन वैभवेन, अनन्यतुल्येन सौन्दर्यप्रकर्षेण संस्कृतीति वृत्तोपयोगिना गुणेन च महती महत्त्वम् भवति।

**वैदिकवाङ्मयम्**

अतिप्राचीनमिदं वैदिकवाङ्मयं तथापि आधुनिका इतिहासविदः दैशिका वैदिकाश्च तेषाम् काल निर्धारणे बद्धकङ्कणाः। यथा—लोकमान्य तिलक् महोदयाः गणिताधारेण वेदानां ६०००ई० पू० ततोऽपि पूर्वकालिकत्वं निर्धारितवन्तः। तत्र नास्ति सन्देहस्यावकाशः। यतो हि वेदानां रचनानन्तरं तद्व्याख्यानभूत आरण्यकाणां रचना अभवत्। ब्राह्मणग्रन्थेभ्यः पश्चात् आरण्यकानाम्, तदनन्तरमुपनिषदाम्, ततो रामायणमहाभारतादि इतिहासपुराणलौकिकसाहित्यानां रचना अभवदिति। अतिव्यापकं विस्तृतञ्चेति वैदिकवाङ्मयम्। इदञ्च सर्वाङ्गपूर्णम्, यतो हि अत्र मानवजीवनोद्देश्यभूताः धर्मार्थकाममोक्षाख्याश्चत्वारो पुरुषार्था अपि विवेचिताः।

---

[1] ऋग्वेदभाष्यभूमिका.

[2] वेदभाष्य भूमिका.

[3]. वेदभाष्य भूमिका.

[4]. निरुक्तम्.

वैदिकवाङ्मये मानवजीवनोपयोगिनः सर्वेऽपि विषयाः साधु विवेचिताः भवन्ति। तत्र प्रेयश्शास्त्रं, श्रेयश्शास्त्रं उभयमपि समभावेनसमेधितं भवति। अत एव भोगमोक्षयोरुभयोः सकलसाहित्यापेक्षया विशिष्टता विद्यते। अध्यात्मदर्शनस्य भारतीयदर्शनानाञ्च रहस्यं तेषां विकासञ्च मूलतः वेदसाहाय्येनैव ज्ञेयं भवति। वेदोत्तरकालसाहित्ये—'ब्राह्मणग्रन्थोऽयमेवं वदति, दर्शनशास्त्रमिदं ब्रवीति, वेदाङ्गभूतमिदं शंसति, अमुकः स्मृतिरिदं कथयति', इत्येवं विधायां स्थित्यां किं कार्यम्, किं न कार्यम्, इत्येतत्कथयितॄणां कर्तव्यमिदं यत् ते वेदं शरणं यान्तु[1] इति।

**वैदिकवाङ्मये दर्शनानां विधिः**

**अङ्गानिचतुरो वेदाः मीमांसा न्यायविस्तरः।**
**पुराणं धर्मशास्त्रञ्च विद्याह्येताश्चतुर्दश॥**
**आयुर्वेदो धनुर्वेदो गन्धर्वश्चेति ते त्रयः।**
**अर्थशास्त्रं चतुर्थन्तु विद्याह्यष्टादशैव तु॥**[2]

वेदस्य उपाङ्गानां प्रकरणे सर्वप्रथममुपाङ्गं भवति इतिहासपुराणम्। द्वितीयमुपाङ्गं भवति धर्मशास्त्रम्। तृतीयः भवति न्यायः, चतुर्था भवति मीमांसा। अनेन प्रकारेणतत्र 'ऋग्यजुस्सामाथर्व'वेदाश्चत्वारः, शिक्षाव्याकरणनिरुक्तकल्पज्योतिषछन्दांसि षड्वेदाङ्गानि, पुराणं, धर्मशास्त्रम्, मीमांसा,न्यायशास्त्रमित्युपाङ्गमिश्रिताः चतुर्दशविद्याः भवन्ति। तथैव केचन आयुर्वेदं,धनुर्वेदं,गन्धर्ववेदं, अर्थशास्त्रञ्चेति चत्वार उपवेदान् स्वीकृत्यअष्टादशविद्या इति कथयन्ति। एता अष्टादशविद्याः **'साङ्गोपाङ्गवेदः'** इति नाम्ना प्रसिद्धाः सन्ति।

**षड्वेदाङ्गानि**

तत्र सङ्क्षेपेन षड्वेदाङ्गानां परिचयो पश्यामः। तत्र "वेदनिबद्धमवन्त्राणां सम्यगुच्चारणं शिक्ष्यते शुद्धं सम्पाद्यते सा शिक्षा" इति। तैत्तिरीयोपनिषदि शिक्षायाः प्रयोजनं दृश्यते यथा—'शीक्षां व्याख्यास्यामः। वर्णः, स्वरः,मात्रा,बलं,साम,सन्तानः। इत्युक्तः शीक्षाध्यायः"[3] इति। आश्वलायनापस्तम्बबौधायनादि सूत्रान् कल्पः इति कथ्यते। ब्राह्मण काले यागस्य प्रचारस्तावान्नासीत्। तेषां ज्ञानाय स्वल्पैः शब्दैः रचितान्येव कल्पसूत्राणि। प्रकृतिप्रत्ययाद्युपदेशेन पदस्वरूपतदर्थनिश्चयाय व्याकरणमुपयुज्यते। वेदानां रक्षार्थं व्याकरणमध्येयम्। लोपागमवर्णविकारज्ञो हि पुरुषः सम्यक् वेदान् परिपालयिष्यति इति पतञ्जलिः।

वेदस्य अर्थावबोधे निरपेक्षतया पदजातं यत्रोक्तं तन्निरुक्तम्[4] इति

---

[1]. सर्वदर्शनसङ्ग्रहः.

[2]. विष्णुपुराणम्।

[3] . तैत्तिरीयोपनिषत्.१.१

[4] . ऋ.भा.भू.पृ.सं.११९

सयणस्य वचनं भवति। अर्थपरिज्ञानार्थमिदमङ्गमारब्धम्। अर्थपरिज्ञानाभिनिवशात् सर्वेभ्यः शास्त्रेभ्यः प्रधानं भवति। वेदमन्त्रान् सम्यगुच्चारयितुं छन्दः उपयुज्यते। अयं छन्दश्शास्त्रं पिङ्गलनामकेनाचार्येण विरचितः।

वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः।
तस्मादिदं कालविधानशास्त्रं यो ज्योतिषं वेद स वेद यज्ञान्॥[1]

तथा च वैदिकमन्त्राणां तत्तद्वर्णानां स्थानप्रयत्नोच्चारणाय शिक्षायाः, कर्मकाण्डस्य यज्ञीयानुष्ठानस्य च निमित्ताय कल्पस्य, शब्दसाधुत्वासाधुत्वबोधाय व्याकरणस्य, वैदिकशब्दानामर्थादि निर्वचनाय निरुक्तस्य, वैदिक-लौकिकच्छन्दसां ज्ञानलाभाय छन्दसः, तथा अनुष्ठानस्योचितकालनिर्णयार्थं ज्योतिषशास्त्रस्य च प्रयोजनमस्ति।

**दर्शनानां परिचयः**

**"नास्तिवेदोदितोलोक इति येषाम्मतिस्थिरा।**
**नास्तिकास्ते तथास्तीति मतिर्येषान्त आस्तिकाः॥**
**अवैदिकप्रमाणानां सिद्धान्तानाम्प्रदर्शकाः।**
**चार्वाकाद्याः षड्विधास्ते ख्याता लोकेषु नास्तिकाः॥**
**वेदप्रमाणकानीह प्रोचुर्ये दर्शनानिषट्।**
**न्यायवैशेषिकादीनि स्मृतास्ते आस्तिकाभिधाः॥"**[2]

तत्र दर्शनानि आस्तिक नास्तिक भेदेन द्विधा भवन्ति। नास्तिकदर्शनानि यथा- चार्वाक, जैन,बौद्धाः (माध्यमिक, योगाचार, सौत्रान्तिक, वैभाषिकाः)। आस्तिकदर्शनानि तावद्यथा—न्याय-वैशेषिक, साङ्ख्य-योग, पूर्वमीमांसा- उत्तरमीमांसा इति। तत्र आस्तिकदर्शनानाम्-नास्तिकदर्शनानाञ्च नीयमानपन्थानः बहवः स्युः, तथापि तेषां सर्वेषां दर्शनानां प्राप्यवस्तुरेकैव भवति। सैव निर्वाणं, निःश्रेयसं, अपवर्गः, मुक्तिः,मोक्ष इति सब्दैः उच्यमानास्ति। मोक्षकामुकं पुरुषं तत्प्राप्तिं कारयितुं सुलभतरसाधकानिदर्शनानि भवन्ति।

**"कोऽहं कुतोऽस्ति मम जन्म च कुत्र गन्ता**
**किञ्चास्ति वै जगदिदं रचना च कस्य।**
**गत्वालयं कथमिदं प्रकटं विभाति**
**सर्वं समादधति वेदनिबद्धमन्त्राः॥"**[3]

कोऽहमस्मि, कुत आयात मम जन्म, पुनः कुत्र मम गमनम्, इयं जगत् किमस्ति, कस्य रचनास्ति, अयं शरीरं कथं लब्धम्, अयं कथं प्रकटो भवति? इत्येतादृशानां सर्वेशामपि प्रश्नानाम् एते दर्शनानि वेदनिबद्धमन्त्रैस्सह उत्तराणि ददन्ति।

तात्विकदृष्ट्या विचार्यमाने खलु दर्शनशब्दार्थः ज्ञाने एव पर्यवस्यति। तत्र

---

1 . आर्चज्यौतिषं.३६

2 . हिन्दूत्व.पृ.स.५०४

3 . वेदमहत्त्वम्.पृ.सं.१५

दर्शनसब्दस्य व्युत्पत्तिस्तावत् 'दृश्यते तत्त्वम् आत्मरूपं, ब्रह्मरूपं वा येन तद्दर्शनम्' इति। तच्च आत्मदर्शन, ब्रह्मदर्शनरूप तत्त्वदर्शनमध्यात्मदृष्ट्यैव भवितुमर्हति नान्यथा। यथा-**'आत्मावारे! द्रष्टव्यो श्रोतव्यो मन्तव्यो निधिध्यासितव्यः'** [1] इत्यादिश्रुतेः प्रमाणत्वात्। सर्वेपि दार्शनिका अमुमेव वाक्यम् आश्रयन्ति।

यथा नैयायिकाः प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तअवयवतर्कनिर्णयवादजल्प-वितण्डाहेत्वाभासछलजातिनिग्रहस्थानानांतत्त्वज्ञानान्निःश्रेयसाधिगमः'[2] इति।

वैशेषिकाः यथा— 'धर्म-विशेष-प्रसूताद्द्रव्यगुणकर्मसामान्य-
वैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसम्॥'[3]

साङ्ख्यदर्शने यथा— 'तत्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम्।
अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम्॥'[4]

वेदान्तदर्शने यथा— आत्मानं चेद्विजानीयादहमस्मीति पूरुषः।
किमिच्छन् कस्य कामाय संसारमनुसंसरेत्॥[5]

आर्हतदर्शने यथा-- चिदचिद् द्वे परे तत्त्वे विवेकस्तद्विवेचनम्।
उपादेयमुपादेयम् हेयम् हेयञ्च सर्वतः॥१॥
हेयन्तु कर्तृरागादि तत्कार्य्यमविवेकिनः।
उपादेयम् परम् ज्योतिरुपयोगैक लक्षणम्॥२॥ [6] इति पद्मनन्दस्य वचनम्।

अनेन ज्ञायते यत् चराचरात्मकमिदं जगत् दुःखपङ्कनिमग्नमिति। अतः भारतीयधर्मस्य कमनीयकल्पद्रुमाः 'दर्शनानां' स्वरूपस्य रहस्यस्य सिद्धान्तस्य च ज्ञानं सर्वेभ्यो नितान्तमपेक्षितमावश्यकञ्चेति।तेन हि भारतवर्षे पावनाः पठनीयाश्चेमे ग्रन्था आलोच्यविषयापेक्षया अर्हनीयतामेवाधिकामाप्तवन्तः।

**वैदिकसंस्कृति**

वैदिककालः पितृप्रधान आसीत्। पिता एव गृहस्य नेता जीवनत्राता आसीत्। ललितकलानाञ्च तदा महद्वैशिष्ट्यमासीत्। वैदिककालीनजनाः सङ्ग्रामेषु प्रिया आसन्। अतः मन्त्रेषु वीरपुत्राणां प्रसूतये देवतानां भव्या प्रार्थना कृताऽस्ति— **'यथाहं शत्रुहोऽसान्यसपत्नः सपत्नहा।'** (अथर्ववे० १।२९।९)[7]। वैदिकयुगे नारीणां

---

[1]. बृ.आ.उ.४।५।७.
[2]. न्यायदर्शनम् १।१।१.
[3]. वैशेषिक सूत्रम्.
[4]. साङ्ख्य कारिका०
[5]. पञ्चदशी....
[6]. हिन्दुत्व. आ.द.पृ.सं.५२१.
[7]. वैदिकवाङ्मयस्येतिहासः.पृ.सं.३०९.

सम्मानमासीत्। तस्मिन् युगे स्त्री सहधर्मिनी आसीत्। 'अयज्ञो वा ह्येष योऽपत्नीकः'[1] आर्थात् अपत्नीको यज्ञकरणे निषिद्ध आसीत्। राजानः शासनपद्धत्यां परमकुशलाः, प्रजावत्सलाश्च आसन्। लौकिकाः जीवन-यापनहेतुना यादृशं देश-काल-जल-पवनादिकं भवन्ति, तादृशमेव सदनं भोजनं वसनं पानं क्रीडनं मनोरञ्जनमन्यच्च सकलमभ्युपगच्छन्ति स्म।

इदृश देश-कालादिकं मनुष्यस्य जीवनपद्धतौ बुद्धौ मानसे शरीरे मस्तिष्के तथैव प्रभावं प्रदर्शयन्ति। सः तदीयैः संस्कारैः संस्कृतो भवति। तादृश संस्कारेण संस्कृत एव संस्कृतिरिति विबुधैर्गीयते। विश्वामित्र-वशिष्ठ-कश्यप-गौतम-अत्रि-भरध्वाजादि गोत्रोद्भूतानां, राम-कृष्ण-बुद्धादि भरतभूसम्भवानां महापुरुषाणां संस्कृतिर्वैदिकी संस्कृतिरिति विश्वविख्याताऽस्ति। इयं संस्कृतिः

**'आनीदवातं स्वधया तदेकम्'**[2],

अथ च **'सङ्गच्छध्वं सम्वदध्वं सं वो मनांसि जानताम्'**[3] इत्येवंविधाभ्यः आचारधाराभ्यः विश्वोपकारिकर्मपरायणानाञ्च इयं वैदिकसंस्कृतिरस्ति।तस्मिन् काले यत्किमपि कर्म कुर्वन्ति तत् निष्कामेन कुर्वन्त आसन्। भारतीयसंस्कृतौ निष्कामकर्मवीचयः सर्वत्र उच्छलन्त्यः प्रवहन्त्यश्च संलक्ष्यन्ते। तेन अनायासेन मुक्तिमपि लभन्त आसन्।

**'तस्मादसक्तस्सततं कार्यं कर्म समाचर।**
**असक्तोह्याचरन् कर्म परमाप्नोति पूरषः॥'**[4]

## उपसंहार

अस्मिन् प्रबन्धे निरीक्षितानां विषयानवलोकयामश्चेत् इदमवगम्यते यत् अस्माकं पूर्वजैः यथा निःश्रेयससिद्ध्यै येन रीत्या यत्नः कृतः तेनैवरीत्या अस्माभिरपि यत्नः करणीयः, आचरणीयश्च इति। यतो हि तेषां मार्गगामित्वम् आस्माकं लाभाय भवति। तेषां आलोचनविधानानि, जीवनविधानानि च अस्मज्जीवनेपि भवेयुरिति आशास्ते।

## सन्दर्भ-सूची

१.आचार्य जगदीशचन्द्रमिश्रः,वैदिकवाङ्मयस्येतिहासः, चौखम्बा सुरभारती प्रकाशः,वाराणसी,२००२.

२. डा. N.S.रामानुजताताचार्यः-पञ्चलक्षणीसिंहव्याघ्रलक्षणे च, रष्ट्रियसंस्कृतविद्यापीठम्, तिरुपति, १९९१.

३. डाँ. रजेन्द्रप्रसाद पाण्डेय, वेदमहत्वम्, वाराणसी,२०६५.

[1]. तैत्तिरीयब्राह्मणम्.२।२।२।६.

[2]. ऋग्वेदः १०।१२९।२.

[3]. ऋग्वेदः १०।१९१।२.

[4]. श्रीमद्भगवद्गीता. ३.१९.

४. प्रो० उमाशङ्कर शर्मा 'ऋषि', माधवाचार्यकृत सर्वदर्शनसङ्ग्रहः, चौखम्बाविद्याभवन्,वाराणसी-२२१००१